# shAstRi pa ncakaM

# શાસ્તૃ પઞ્ચકમ્

## Document Information

Text title : shaastrupancakam

File name : shaastrupancakam.itx

Category : deities_misc

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : April 23, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

shAstRi pa ncakaM

# શાસ્તૃ પઞ્ચકમ્

પાદારવિન્દ ભક્તલોકપાલનૈકલોલુપં
સદારપાર્શ્વમાત્મજાતિ મોદકં સુરાધિપમ્ ।
ઉદારમાદિ ભૂતનાથમદ્ભુતાત્મવૈભવં
સદા રવીન્દુકુણ્ડલં નમામિ ભાગ્યસંભવમ્ ॥ ૧
કૃપાકટાક્ષવીક્ષણં વિભૂતિ વેત્રભૂષણં
સપાવનં સનાતનાદિ સત્યધર્મ પોષણં
અપારશક્તિયુક્તમાત્મલક્ષણં સુલક્ષણં
પ્રભામનોહરં હરીશભાગ્યસંભવં ભજે ॥ ૨
મૃગાસનં વરાસનં શરાસનં મહૈજસં
જગધિતં સમસ્તભક્ત ચિત્તરંગસંસ્થિતમ્ ।
નગાધિરાજરાજયોગપીઠમધ્યવર્તિનં
મૃગાઙ્કુશેખરં હરીશભાગ્યસંભવં ભજે ॥

સમસ્તલોક ચિન્તિતપ્રદં સદા સુખપ્રદં
સમુત્થિતાપદન્ધકારકૃન્તનં પ્રભાકરમ્ ।
અમર્ત્ય નૃત્તગીતવાદ્યલાલસં મદાલસં
નમસ્કરોમિ ભૂતનાથમાદિધર્મપાદુકમ્ ॥ ૪
ચરાચરાન્તર સ્થિત પ્રભામનોહર પ્રભો
સુરાસુરાર્ચિતાંઘ્રિ પદ્મયુગ્મ ભૂતનાયક ।
વિરાજમાનવક્ત્ર ભક્તમિત્ર વેત્રશોભિત
હરીશભાગ્યજાત સાધુપારિજાત પાહિ મામ્ ॥

ઇતિ શ્રી શાસ્તૃ પઞ્ચકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

*shAstRi pa ncakaM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*